1. Ms. no. 32. Samrāṭ-siddhānta (Rekhā-gaṇita) in Sanskrit by Jagannātha Samrāṭ under orders of Savāī Jayasimha.

2. Ms. no. 65. Bihārīsatsaī (Vrajabhāṣā) by Bihārī lāla, dt. 1718 V. S.; bears a seal of Maharājā Mirzā Rājā Jayasimha of Āmera.

3. Ms. no. 49. Sūradāsaji-kā Pada; (Vrajabhāṣā) written for Chītarjī s/o Naraharidāsajī; Scb. Rāmadāsa at Fatehpura in 1639 V. S. (1582 A. D.); acquired in 1701 A. D.

4. Ms. no. 86. Sphera (Laṭin) by H. R. Aliay Josheph-du-Buoy; written in 1732 A.D. at Jaipur.

5. Ms. no. 93. 'Amera aur Jayapura ke Rājā' with 19 portraits; 20th c., Jaipur.

6. AG-2162 S'rīmad-Bhāgavatam (Sanskrit) with 1032 illustrations; written by Vanamālīdāsa in 1655 V.S. (1597-98 A.D.); out of the twelve skandhās three appear to be later additions; paintings by Govindadāsa s/o Nārada.

7. AG-2158 Makhzan-e-Isrāra (Persian) with 228 illustrations; Scb. Nizāmī Ghanzavi; 954 A. H. (1547 A. D.); bears a seal of Mohammad-vald-Lāhāsī.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

APPENDIX

Details of important manuscripts

1. Sanskrit

2. (174) **गरुडोपनिषद्**

The following extra मन्त्र is noted at the end :—ॐ शिव ॐ तत्कारीं मत्कारीं ह्लीं विषनाशिनीं विषविदूषिणीं, विषसर्पिणीं विषभक्षिणीं हतां विष नष्ट विषं प्रणष्टं विषं हतं, ते ब्रह्मणा विषं हतमिन्द्रस्य वज्रेण स्वाहा ॥१॥

मन एव कृतं राम न शरीरं कृतं कृतम् ।
येनैवालिङ्गिता कान्ता तेनेवालिङ्गिता वधू ॥

9. (115) नृसिंहतापनीयोपनिषद्भाष्यम्

(विवरणम्) उत्तरार्द्धं, श्रीमच्छुकमुनीन्द्रशिष्यश्रीमद्गौडपादमुनिविरचितम् ।

Post-colophonic : **तारणे वत्सरे** मासि श्रावणेऽसितपक्षगे ।
पञ्चमीरेवतीयुक्ते तिथौ कुम्भेशपत्तने ।
नृसिंहतापनीयाख्यटीकां गौडाभिधां सतीं ।
व्यासेश्वरो ऽ लिखत्स्वाप्त्यै नृसिंहस्तेन तुष्यताम्॥

तारण is षष्टि वर्ष । from the other dated manuscript in the hand of the same scribe it may be inferred that it is V.S. 1860.

16. (133) **जातिविवेक:**

OPENING : श्री गणेशाय नमः ॥
सत्यलोकाधिपो देवो ब्रह्मा वै चतुराननः ।
आद्ये कृतयुगस्यादौ निविष्ठ (ष्टः) कमलासने ॥१॥
सृष्ट्वा प्रजापतिः पूर्वं देवान् दैत्यांश्च राक्षसान् ।
स्वमुखान् (द्) ब्राह्मणान् जज्ञे क्षत्रियान् बाहुतस्तथा ॥२॥
ऊरुद्वयात्ततो जज्ञे वैश्यान् शूद्रान् पादतः ।
आहूय विश्वकर्माणं ब्रह्मा कमलसम्भवः ॥३॥

CLOSING : मासार्धमेकमासं वा मासत्रयमथापि वा ।
अब्दार्थं (र्ध) मेकमब्दं वा भवेदूर्ध्वं तु तत्समः ॥
इति जातिविवेकः समाप्तः ॥

Colophon : संवत् १८६८ पौष कृष्णैकादश्यां सौम्यवासरे उत्तराह्ने श्रीगुर्वनुगृह्यमाणः श्रीहेरम्बपदद्वयपद्मासक्तमनाः कश्चित्पुरुषः लिखितवान् । यथा पुस्तकं दृष्टं तथैव लिखितं यदि शुद्धमशुद्धं स्यात् तर्हि लेखकस्य दूषणं; नास्ति केनापिदातव्यं ॥
श्री हेरंब गजानन.........

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

28. (236–2) प्रदोषनिर्णयः

OPENING : श्री गणेशाय नमः ।।
अथ शनिप्रदोषसोमप्रदोषभौमप्रदोषादिव्रतपक्षप्रदोषनिर्णायकवचननिर्णीते दिवसे शन्यादिवारसत्वेऽनुष्ठेयनिर्णायकान्यवरुद्ध्येव केवलं शन्यादिवारेषु प्रदोषसमये त्रयोदश्याः सत्त्वे तत्तदनुष्ठेयमिति संशये उच्यते ।

CLOSING : ततश्च पक्षप्रदोषनिर्णायकानपेक्ष्य एव तन्निर्णय इति शनौ प्रदोषसमये त्रयोदशी-सत्वे प्रदोषादिष्वप्यनुसन्धेयम् इति संक्षेप इति विमर्शो रानडोपाख्यस्य बाल-शास्त्रिण इति शम् ।।

41. (126) संस्कारकौस्तुभः

Closing & Colophon : विक्रमाजीत संवत् १८८९ शालिवाहन शके १७५४ शोभन नाम संवत्सरे दक्षिणायने शरद रितौ आश्विनमासे शुभे कृष्णपक्षे एकादश्यां गुरुवासरे समाप्ता ।।

दुग्वेकर इत्युपनामक पं. श्रीवेदमूर्ति धुंडिराजशास्त्री तस्येदं पुस्तकं ।। सर्वद्ये इत्युपनामक नाथुरामात्मज वामनेन लिखितं ।।

49. (237) गौराङ्गराज्यविचारः

OPENING : श्री गणेशाय नमः ।।
अथ गौराङ्गमौनराज्यविचारः ।।
तुष्ट्यै सुमनसां वक्ष्ये द्विजानां धर्मचेतसाम् ।
गौराङ्गमौनराजानां भारते स्थितिनिर्णये ।।१।।
तत्र गौराङ्गाः म्लेच्छविशेषाः तेषां ताम्रमुखाः इत्यपरं नाम ।। मंथा (मृषा) न भैरवतंत्रे तेषामुत्पत्तिरुक्ता—
मयासुरस्य कन्यायां मेघनादो वभूव ह ।
तस्य पुत्रास्ताम्रमुखा जम्वूद्वीपनिवासिनः ।।
भविष्यन्ति मदोन्मत्ताः सर्वदेशेषु सर्वदा ।
यदा पूर्वाब्धिमारभ्य पश्चिमाब्धिगता इमे ।।
तदा विनाशो जानीयात् सर्वत्रैव वरानने । इति

CLOSING : मार्गशीर्षे सिते पक्षे षष्ठ्या चानन्दवत्सरे ।
सोमे श्रवणनक्षत्रे ताम्रराज्यं विनश्यति ।।
आनन्दे मार्गशीर्षे च शुक्लपक्षेऽष्टमीतिथौ ।
सोमे श्रवणमध्याह्ने ताम्रराज्यं विनश्यतीति ।।
पाठान्तरे ।। सूरदासतुलसीदासप्रभृतिभिः स्वयमेवार्थः प्राकृतभाषणनिबन्धेत्यल बहुविस्तरेणेति शिवं ।।
इति राघवेन्द्राचार्यविरचितगौराङ्गराज्यविचारः ।।
इति गौराङ्गः नष्टः ।।श्री राम ।।६।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

75. (A. G. 2171) **शालग्रामशिलालक्षणानि**

OPENING : ।। श्रीगोविंददेवो जयति ।।

अथ शालग्रामशिलालक्षणानि ।।

तत्रादौ मत्स्यमूर्तिलक्षणानि ।। ब्रह्माण्डपुराणे ।।
दीर्घा द्वारयुता स्निग्धा द्वारमध्ये द्विचक्रयुक् ।।
चक्रमेकं पुच्छभागे दक्षिणे शफराकृतिः ।।
वामे प्रदृश्यते रेखा मत्स्यमूर्तिः शुभप्रदा ।।

बड़ो द्वार जामें चिकनी द्वार में दोय चक्र, पुच्छ भाग में एक चक्र, दाहिनी ओर मत्स्याकार, बाईं ओर रेखा एक सो मत्स्यमूर्ति शुभदाता, एक लछन भयौ ।।१।।

।। पुराणसंग्रहे ।।

विंदुत्रयसमायुक्तं चक्रं वा शङ्खलाञ्छनम् ।
दीर्घं च दक्षिणास्यं च मात्स्यं चक्रं प्रकीर्तितम् ।।

तीन बिंदुचक्र वा शङ्खलाञ्छन, दीर्घ दक्षिण की ओर मुख सो मत्स्यचक्र कहिए ।।२।।

।। ब्राह्मे ।।

दीर्घा काचवर्णा च बिंदुत्रयविभूषिता ।
मत्स्यारष्या (कृत्या) सा शिला ज्ञेया भुक्तिमुक्तिफलप्रदा ।।

बड़ी, काच-सो वर्ण, तीन बिंदु सो मत्स्यशिला, भुक्तिमुक्ति को दाता ।।३।।

।। विष्णुरहस्ये ।।

मत्स्यरूपं तु देवस्य दीर्घाकारं सुपूजितम् ।
विन्दुत्रयसमायुक्तं कृष्णवर्णं सुशोभनमिति ।।

मत्स्यरूप देव को आकार, दीर्घ, तीन बिंदु, कृष्णवर्ण, शोभन यो चौथो लक्षण ।।४४।।

CLOSING : (p. 211a)

।। अथ सौभाग्यवरदलक्षणम् ।। पुराणसंग्रहे ।।

उन्नतः पृष्ठभागे स्यादधोभागे तु वर्तुलः ।
नीलवर्णप्रतीकाशो धनुर्बाणसमन्वितः ।।
सांकुशो वामपार्श्वे च वनमालाविभूषितः ।
सौभाग्यवरदः कृष्णः सर्वसंपत्प्रदायकः ।।

पीठ में ऊंचो, नीचे गोल, नीलो-सो वर्ण, धनुषबाण धरें, बाईं ओर अंकुश और वनमाला करि भूषित, सो सर्वसंपत् को दाता सौभाग्यवरद कृष्ण कहिए ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

शालग्रामशिलालक्षणसूची

क्र.सं.	शालग्रामनाम	लक्षणसंख्या
१.	मत्स्यमूर्त्ति	४
२.	कूर्म	६
३.	वराह	८
४.	विदारण	२
५.	वामन	६
६.	परशुराम (उग्र, शान्त)	४
७.	राम (१–राममूर्त्ति २–दाशरथि ३-दाशरथि राम ४–बालराम ५–एकचक्र-राम ६–सीताराम ७–सीताराम ८–सीताराम ९–तारकब्रह्म सीता-राम १०–दशकंठकुलान्तकराम-११-वीर-राम १२–विजय-राम १३–हृष्ट-राम १४–कोदण्ड-राम १५–कलिनाशक-राम १६-श्रीराम १७–श्रीराम १८–पट्टाभिराम)	१८
८.	बलभद्र	६
९.	बुध	३
१०.	कल्कि	३
११.	केशवमूर्ति	५
१२.	नारायणमूर्ति	५
१३.	लक्ष्मीनारायणमूर्ति	१६
१४.	नारायण	१
१५.	रूपनारायण	१
१६.	वीरनारायण	२
१७.	मायानारायण	१
१८.	शंकरनारायण	२
१९.	महानारायण	१
२०.	माधवमूर्ति	५
२१.	गोविन्दमूर्ति	५
२२.	विष्णुमूर्ति	१२
२३.	मधुसूदनमूर्ति	७
२४.	त्रिविक्रममूर्ति	११
२५.	दधिवामनमूर्ति	४

क्र०सं०	शालग्रामनाम	लक्षणसंख्या
२६.	श्रीधरमूर्ति	८
२७.	हृषीकेशमूर्ति	८
२८.	पद्मनाभ	६
२९.	दामोदरमूर्ति	६
३०.	लक्ष्मीदामोदर	१
३१.	शंकर	४
३२.	वासुदेव	८
३३.	प्रद्युम्न	५
३४.	अनिरुद्ध	५
३५.	पुरुषोत्तम	१०
३६.	अधोक्षज	२
३७.	नृसिंह	३
३८.	लक्ष्मीनृसिंह	४
३९,	बालनृसिंह	१
४०.	कपिलनृसिंह	५
४१.	योगनृसिंह	२
४२.	सर्वतोमुखनृसिंह	२
४३.	पातालनृसिंह	३
४४.	आकाशनृसिंह	१
४५.	विद्युज्जिह्वनृसिंह	१
४६.	अधोमुखनृसिंह	१
४७.	विभीषणनृसिंह	१
४८.	हारनृसिंह	१
४९.	ज्वालानृसिंह	१
५०.	कुक्षिनृसिंह	१
५१.	विवृतास्य-नृसिंह	१
५२.	महानृसिंह	१
५३.	घोरनृसिंह	१
५४.	अच्युत	३
५५.	जनार्दन	६
५६.	उपेन्द्र	३
५७.	हरिमूर्ति	६
५८.	कृष्णमूर्ति	४
५९.	बालकृष्ण	१
६०.	गोपालकृष्ण	१

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्र०सं०	शालग्रामनाम	लक्षणसंख्या
	गोवर्द्धनकृष्ण	१
६२.	त्रैलोक्यकृष्ण	१
६३.	रुक्मिणीकृष्ण	१
६४.	विजयकृष्ण	१
६५.	चूडामणि	१
६६.	धनञ्जयकृष्ण	१
६७.	सनातनकृष्ण	१
६८.	पारिजातकृष्ण	१
६९.	स्यमन्तकहरणकृष्ण	१
७०:	कंसमर्दनकृष्ण	१
७१.	कालियमर्दनकृष्ण	१
७२.	चाणूरमर्दनकृष्ण	१
७३.	गोवर्द्धनगोपाल	१
७४.	श्रीगोपाल	१
७५.	सन्तानगोपाल	१
७६.	लक्ष्मीगोपाल	१
७७.	मदनगोपाल	२
७८.	वंशगोपाल	१
७९.	गोवर्द्धनधरगोपाल	२
८०.	अनन्त	८
८१.	विश्वरूप	२
८२.	वैकुण्ठ	११
८३.	हयग्रीव	८
८४.	कपिलहयग्रीव	१
८५.	चतुर्भुज	१
८६.	गदाधर	५
८७.	पुण्डरीकाक्ष	३
८८.	सुदर्शन	११
८९.	योगेश्वर	१
९०.	विष्णुपंजर	१
९१.	यक्षमूर्ति	२
९२.	दत्तात्रेयमूर्ति	२
९३.	शिशुमारमूर्ति	१
९४.	हंसमूर्ति	२
९५.	परमहंसमूर्ति	२
९६.	लक्ष्मीपतिमूर्ति	१

क्र०सं०	शालग्रामनाम	लक्षणसंख्या
९७.	गरुडध्वजमूर्ति	१
९८.	वटपत्रशायीमूर्ति	१
९९.	शेषशायी	१
१००.	विश्वंभर	१
१०१.	सत्यवीर	२
१०२.	पीताम्बरदेव	२
१०३.	अमृताभरण	१
१०४.	नरमूर्ति	१
१०५.	शेषमूर्ति	३
१०६.	गरुडमूर्ति	५
१०७.	वनमाली	१
१०८.	मुरारि	१
१०९.	मुकुन्द	१
११०.	मुकुन्दानन्द	१
१११.	श्रीवत्सलाञ्छन	२
११२.	धरणीधर	१
११३.	योगराज	१
११४.	श्रीमूर्ति	२
११५.	श्रीसहायमूर्ति	१
११६.	पुराणपुरुषोत्तम	१
११७.	कपिलमूर्ति	१
११८.	अव्ययमूर्ति	१
११९.	क्षीराब्धिशायीमूर्ति	१
१२०.	मुसलायुध	१
१२१.	चक्रपाणि	१
१२२.	बहुरूप	१
१२३.	पातालनृसिंह	१
१२४.	जगयोनि	१
१२५.	त्रिमूर्ति	१
१२६.	हैहयमूर्ति	१
१२७.	विश्वक्सेन	२
१२८.	सद्योजात	१
१२९.	वामदेव	१
१३०.	ईशानदेव	१
१३१.	शंकरदेव	२
१३२.	चन्द्रशेखर	२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्र.सं.	शालग्रामनाम	लक्षणसंख्या
१३३.	शिवनाभि	३
१३४.	भवदेव	१
१३५.	गणेश	२
१३६.	सूर्य	४
१३७.	विश्वकुण्डली	२
१३८.	शिवकुण्डली, शिवशक्तिकुण्डली, गणेश, सूर्यकुण्डलिनी	५
१३९.	हरिहरमूर्ति	३
१४०.	धर्मराजमूर्ति	१
१४१.	परमेष्ठी	८
१४२.	पितामह	१
१४३.	हिरण्यगर्भ	६
१४४.	स्वयंभू	१
१४५.	चतुर्मुख	१
१४६.	सौभाग्यवरदकृष्ण	१

संदर्भग्रन्थसूची

क्र.सं.	ग्रन्थनाम
१.	ब्रह्माण्डपुराण
२.	पुराणसंग्रह
३.	ब्रह्मपुराण
४.	विष्णुरहस्य
५.	पद्मपुराण
६.	कूर्मपुराण
७.	वराहपुराण
८.	नृसिंहपुराण
९.	वामनपुराण
१०.	पुराणान्तर
११.	ब्रह्मवैवर्तपुराण
१२.	स्कन्दपुराण
१३.	अग्निपुराण
१४.	गरुडपुराण
१५.	वैखानससंहिता
१६.	विष्णुधर्मोत्तरपुराण
१७.	नारदपुराण
१८.	नारदपाञ्चरात्र

80. (254) गायत्रीविवरणम्

OPENING : ।। श्रीगणेशाय नमः ।। श्रीहरये नमः ।।

ॐ निर्गुणाय विशुद्धाय व्यापिने सर्वसाक्षिणे ।
सत्यज्ञानस्वरूपायानन्दायादित्याय गुरवे नमः ।।१।।

कश्चिन्मुमुक्षुः सद्गुरुं समेत्य पप्रच्छ ब्रह्मविद्या कथं प्राप्यते तं होवाच श्रद्धाभक्तिध्यानयोगैर्निष्कामेण धर्मसेवनेन गुरुशुश्रूषयानन्ययान्तःकरणशुद्धिपूर्वकं ब्रह्मविद्याप्राप्तिर्भवति तेन परमानन्दो भवति अथ श्रद्धादीनां स्वरूपं वक्ष्यामि, प्रज्ञानमानन्दं ब्रह्माहं ब्रह्मास्मि तत्त्वमस्ययमात्मा ब्रह्मेत्यादिषु गुरूक्तेषु महावाक्येषु दृढनिश्चयः सोहमस्मीति ज्ञानं श्रद्धा······

CLOSING : इदं गायत्रीमंत्रसंयुतात्मरूपं कबीरध्यानं अनुभवं यः पठति विचारयति नित्यं स स्वानुभवं प्राप्नोति सद्गुरुस्तं सर्वबन्धनान्मोचते सर्वं नानात्वं नश्यति शान्तौ सुखे स गच्छति इदं महद्दिव्यं आत्मतत्त्वं अन्यशास्त्रे न लिखितं गुह्या-(द्) गुह्यतमं श्रीकबीरस्यानुभवरूपं सद्गुरौ हरौ च यस्य भक्तिः प्रेम नम्रता श्रद्धा च सर्वभूतेष्वद्रोहश्चैतद्विशिष्टाय इदं तत्त्वं देयं ॐ सहनाववतु० ॐ शान्तिः ३ हरिः ॐ इति श्रीसाधुश्रीकबीरकृतौ गायत्रीविवरणे नवमं ध्यानम् ९ । ॐ तत्सद्ब्रह्मार्पणमस्तु श्रीमत्सद्गुरुरामार्पणमस्तु । संवत् १९१२ कार्तिकमासे कृष्णपक्षे तिथौ ४ मंगलवार संपूर्णं ।।१।। श्री राम जय राम छः छः छः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

86. (132) **रत्नत्रयपरीक्षा**

OPENING : श्रीगणेशाय नमः ।। श्रीसाम्बाय नमः ।
सर्वज्ञानादिकं शम्भोर्यस्या रूपं विदुर्बुधाः ।।
तां नमामि शिवां सत्यज्ञानानन्दस्वरूपिणीम् ।।
अथ रत्नत्रयपरीक्षाख्यामष्टश्लोकीं संक्षेपेण व्याकुर्महे—
नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकम्
धर्मो धर्मीति रूपद्वयमयति पृथग् भूय मायावशेन ।
धर्मस्तत्रानुभूतिः सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपो भवति गुणगणश्चाश्रयस्येक एव ।।१।।

CLOSING : आमथ्य भाष्यदुग्धाब्धिमाप्तं रत्नत्रयं ततः ।
शम्भुर्गौरी हरिश्चेति तच्च सम्यक् परीक्षितम् ।।

Colophon : "इति श्रीभट्टभरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजि-
श्रीरङ्गराजाध्वरिवरसूनोरप्पदीक्षितस्य कृतौ रत्नत्रयपरीक्षा समाप्ता ।।
भाष्यव्याख्यानकर्तारौ श्रीकण्ठाप्पयदीक्षितौ ।
नमामि दक्षिणामूर्तेरंशजौ च स्वदेशिकम् ।।
भारद्वाजकुले परेशकृपया वर्वर्ति भूमण्डले,
यस्मिन् संजनितो विमुक्तिफलिको ह्यद्वैतविद्यागुरुः ।
तत्सूनुः प्रथितः प्रभाकर इव श्रीरङ्गराजाध्वरिः.
श्रीमत्तत्तनुजाप्पदीक्षितकृतिः सम्पादि चैषा मया ।।
साम्बसदाशिवाभ्यां नमः ।।
कल्याणं वः क्रियासुर्मिलदर (?) नियुगस्थास्नुगीर्वाणभोगि-
स्त्रैणव्यत्यस्तकल्पद्रुमसुमनो नागहारावलीति ।
नालीकश्लिष्टलक्ष्मीकरतलनलिनोद्वांतमाध्वीकधारा-
तिम्यद्भालेक्षणानि त्रिपुरविजयिनो ज्यालताकर्षणानि । १।।

98. (129) **खण्डनखण्डखाद्यम्**

OPENING : श्रीगणेशाय नमः ।।
अविकल्पविषय एकः स्थाणुः पुरुषः श्रुतोऽस्ति यः श्रुतिषु ।।
ईश्वरमुमया न परं वन्देऽनुमयापि तमधिगतम् ।।१।।
मानापनोदनविनोदनते गिरीशे श्री (भा) सेव संकुचितयोरुचितं तदिन्दोः ।
भेत्तु भवानिशचितं दुरितं भवानि नम्रीभवानि घनमङ्घ्रिसरोजयोस्ते ।।२।।

Colophon : इति श्रीहर्षकृताऽनिर्वचनीयसर्वस्वे खण्डनखाद्ये तुरीयः संकीर्णपरिच्छेदः
समाप्तः ।। सं. १८८५ रा जेष्ठमासे शुक्लपक्षे च द्वादश्यां सोमवासरे लिख्यतं
द्विज वनीराम जोधपुरनगरे ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

99. (134) **गादाधरी काशिका**

OPENING : ।।श्रीगणेशाय नमः।।

हरिमादौ नमस्कृत्य कृष्णो नारायणानुजः ।
वितनोत्यध्यक्षटीकां गदाधरपदाश्रयाम् ।।१।।
प्रत्यक्षदीधितिप्रौढिप्रौढे गादाधरे मते ।
प्रचारेच्छो राङ्गनाथेः साहसं क्षम्यतां बुधाः ।।२।।

Closing & Colophon : श्रीरस्तु ।।

हरिचरणसरोज-हृदन्ते पूजनीयैर्विविधवस्तुसमा(भा)जान् नममाणान्निशम्य ।
मणिफणिसुसमीक्षा काशिकावर्णमन्त्रैर्भ्र महरपरिपाटीपुष्पपूजां तनोमि ।।

इति श्रीरङ्गनाथसूरिसूनोर्नारायणानुजस्य कृष्णभट्टस्य स्वस्त्यस्तु प्रथम-विप्रतिपत्तिगादाधरी काशिकाकृतिः ।।

श्रीगुरुचरणाभ्यां नमः ।।

110. (122) **प्रत्यक्षमणिदीधितिः**

OPENING : श्रीगणेशाय नमः।। श्रीः

गिरं गुरूणां हृदये निधाय विधाय सिद्धान्तसरोऽवगाहः ।
संक्षेपतः **श्रीरघुनाथनामा** चिन्तामणेर्दीधितिमातनोति ।।१।।

प्रेक्षावत्प्रवृत्तये फलवच्छास्त्रोपकरणत्वेन प्रयोजनवतामभिधेयसम्बन्धौ चाह स्वीयग्रन्थस्थ अथेत्यादिना विविच्यत इत्यन्तेन (इत्थं तेन)······

CLOSING : अपि च सत्यस्थल इवान्यत्रापि इव रजतत्वेन जानामीति प्रत्ययादन्यथा-ख्यातिसिद्धिः कारणबाधस्य निरस्तत्वादिति संक्षेपः ।।

इति श्रीशिरोमणिविरचिता प्रत्यक्षमणिदीधितिः समाप्ता ।। अनेन प्रीयतां देवो भगवान्मङ्गलेश्वरः लक्ष्मीनृसिंहः पूर्वेषामस्माकं कुलदैवतं । संख्या १०७१

125. (121) **शब्दशक्तिप्रकाशिका**

OPENING : ॐ नमो गुरुभ्यः ।।

विश्वतातजगन्मातरेवं गौरीगिरीशयोः ।
मिथः संभाषया स्मारं (स्मेरं) हेरम्बं समुपास्महे ।।१।।
गुरुमिव गुरुमिह नत्वा तत्कृत**शब्दशक्तिप्रकाशिकायाः** ।
श्रीरामभद्रकृती कुरुते **टीकां** मुदे सुधियः ।।

CLOSING : भावद्वयकोटिकसंशयसत्वे बलवत्तरप्रमाणाभावात्तत्रापि चतुष्कोटिक एव संशय इति द्वित्रा इत्यादौ च भावस्य संशयकोटितयाऽनुभवस्य बाधितत्त्वात् इत्याशयेनाहुरित्युक्ताऽस्वरसो व्यञ्जितः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

इति नवद्वीपीयमहामहोपाध्याय–श्रीरामभद्रसिद्धान्तवागीशभट्टाचार्यविर–(चि) ता शक्तिप्रकाशिकाप्रबोधिनी पंथिनिस्वरूपा समाप्ता ।। श्री गोविन्द ॐ सूर्यगणेशमहालक्ष्मीशिवविष्णाय (ष्णुभ्यः) नमः ।।

135. (215) अर्पणमीमांसा

OPENING : श्रीकृष्ण (:) शरणं सदास्ते ।।

नियोजयामास कृतीः समस्ता गीतोपदेष्टा स्वकृतौ हरिर्यः ।
करोतिरर्थेष्विव सर्ववस्तू स्तदंघ्रियुग्मं हृदयं ममास्ते ।।

यजेत जुहुयाद्द्यादित्यादौ धातुप्रत्यययोर्भिन्नार्थकता प्रत्ययस्य साधुत्वादर्थत्वादिति प्रायो वादखण्डनायायमारम्भः ।।

CLOSING : समंजसं वाप्य समंजसं वा, गीतावचोऽर्थं प्रतिपादितं सः ।
सरस्वतीहेतुनिदाननाभः, क्षन्तुं कृपालुस्त्रिदशावतंसः ।।२।।
मीमांसंतां फलानि प्रतिपदमधुना मुख्यतां वा भजन्तां
किं वा कामांल्लभंतां सपदि विदधतां किन्तु नः सर्वभावैः ।
सेव्या वेदान्तवाचामिव परमपदं वासुदेवोक्तिगम्या
तद्भाव्या भावनेत्थं कलयतु विदुषां वृन्दमुक्तिं कवीनाम् ।।३।।

इति श्रीमत्पूर्वोत्तरमीमांसापारंगतवालदेवसुतवावादेवविरचिताऽर्पणमीमांसा समाप्ता ।।

154. (25) गीतापञ्चरत्नगुटका

Post–colophonic वस्वानीतमनुष्यलोचनहरिन्नाथेन्दुसंख्याङ्किते
वर्षे फाल्गुनशुक्लसौम्यदिवसे होलीविलासाद्भुते ।
पृथ्वीसिंहमहीमहेन्द्रववनाधीनं प्रवीणः सुखा-
सीनः काञ्चन पञ्चरत्नगुटिकां घासीमहात्माऽलिखत् ।।१।।
शुभं भूयात् ।। यादृशमिति······· ····

155. (26) गीतापञ्चरत्नगुटका

Post–colophonic वर्षेऽस्मिन्निधिनेत्रदिग्गजनिशानाथाङ्कसंख्यान्विते
शुक्लाषाढनिगूढमङ्गलभृते श्रीपूर्णिमापूजिते ।
पृथ्वीसिंहमहीमहेन्द्रशासनवशात्सौवर्णरूप्याक्षरै-
र्व्यासोद्भासित-पञ्चरत्नगुटिकां घासीमहात्माऽलिखत् ।।

167· (221) प्रचण्डभास्करः

OPENING : श्रीगणेशाय नमः ।। श्रीकृष्णो जयतितराम् ।।

सन्मार्गरोधननित्यभावमृषान्नगारण्यसमान् विरूढान् ।
संक्षंतुकामो गुरुशाणघृष्टं, वाक्यं सुतीक्ष्णासिमथाददे दहम् ।। १

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

असच्छास्त्रतमःपुञ्जनखसज्नपद्धतिं
प्रदर्शयन्नुदयते नास्तोऽसौ चण्डभास्करः ॥२॥
भागवतश्रवणाज्जीवस्य भगवद्धामप्राप्तिरिति सर्वसम्मतं किन्तु भागवते सन्देहः, किं देवीभागवतमप्यादर्शान्तिर्गतमुत वैष्णवाभिमतभागवतमिति तत्र केचित् मन्यन्ते ॥

Colophon : इति श्रीमहाराजश्रीमहाराजाश्रीराजाबहादुरविश्वनाथसिंह-कृत-प्रचण्ड-भास्करस्सम्पूर्णः॥ सं० १९२३ मि० अधिक ज्येष्ठ कृ० ९ गुरुवार लिखवाई श्रीमद्गोस्वामीदम्पति किशोरजू के प्रसन्नार्थं अग्रे हरे कृष्ण गोविन्द वासुदेव देवादिदेव व्रजदेवाय नमः ॥

169. (219–1) प्रेमपत्तनम् अपरनाम परप्रेमसर्वस्वपूर्णसन्दर्भः

OPENING : श्रीचैतन्यचन्द्रो जयति
कृष्णं कृष्णपरिष्वङ्गसतृष्णं गौरसुन्दरम् ।
धन्यं कीर्तिसुतानन्यं मन्यं चैतन्यमाश्रये ॥ १ ॥
अस्यानल्पं जल्पतो दासभावाद्गूढ लीढोच्छिष्टविन्दून् मदस्य ।
अन्तःपीतप्रेममाध्वीकघूर्णावन्तः सन्तः साहसं मा हसन्तु ॥ २ ॥
मतिरतियुवतिपतिर्यत्पालयिता मधुरमेचको राजा
गगने विलसति नगरं नैकशिरो मन्दिरं नाम ॥ ३ ॥
यत्र वशीकृतदयिता पत्युर्दयिताऽतिगर्विता ।
सततं रतिरनुकूला महिषी यत्र मतिं कदर्थयामास ॥ ४ ॥
पितृभवनमाधिशमनं विज्ञा विज्ञाय पत्तनं पत्युः ।
रत्यावमानितस्त्रीजितेन तेनापि तत्याज ॥ ५ ॥

CLOSING : संसृजन्तु समदृष्टयः स्रजं, कुन्दकिंशुककदम्बचम्पकैः ।
कोविदास्तु युगसंगमोचितं, दाम कर्तुमिह वामलोचनाः ॥
काचं मणिं कांचनमेकसूत्रे गुम्फन्ति मन्दाः किमु तत्र चित्रम् ।
विरोधवित्पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह ॥
इति रसिकोत्तंसविरचितं प्रेमपत्तनापरपर्यायपरप्रेम-सर्वस्वपूर्णं सन्दर्भाख्यं नाम सम्पूर्णतामगात् ॥
शके तिथिघनैस्तुल्ये द्विर्माधव सिता हि ये(?)वुधे लिपीकृतं चैतन्मनसाराम-शर्मणा ॥१ युगलं शरणम्

170. (219–2) प्रेमपत्तन-टीका

OPENING : श्रीराधाकृष्णाभ्यां नमः
प्रेमपत्तनाभिधममुं सन्दर्भं व्याख्यातुकामः कविः श्रीहरिगुरुचरणस्मरण-लक्षणं मङ्गलमाचरति, अनर्पितचरीमिति—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनर्पितचरीं चिरात्करुणयावतीर्णः कलौ
समर्पयितुमुन्नतोज्ज्वलरसां स्वभक्तिश्रियम् ।
हरिः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु नः शचीनन्दनः ।।
श्रीशचीनन्दनो हरिः नः हृदयकन्दरे सदा स्फुरत्विति सबन्धः ।

CLOSING : रसिकोत्तंसस्तपूज्यपादपल्लवरेणुभृत् ।
प्रेमपत्तनसंदर्भव्याख्यां चक्रे यथामति ।। १ ।।
इति रसिकोत्तंसान्तेवासिकृतं प्रेमपत्तनसन्दर्भटिप्पणं पूर्तिमगात् ।।
शके तिथिघनैस्तुल्ये शुक्रकृष्णाऽम्बिकातिथौ
रवौ विलिखितं चेदं मनसारामशर्मणा ।। १ श्रीः ।।

195. (112) शैवसुधाकरः

OPENING : ।। श्रीगणेशाय नमः
ॐ तत्सत्सुखचित्तनुमतिगिरां यो नास्पदं मायया
जीवेशादिविभेदभाक्खपवनाग्न्य(म्बु)भूमिकृल्लीलया ।
स्वेषां स्थूलतमांसि वीक्ष्य तु मतिं लोकेऽवतीर्णः प्रभु-
र्लिङ्गात्मा करुणार्द्रधीर्विजयतां श्रीसाम्बमूर्तिः शिवः ।।१।।
क्षोणीमण्डलमण्डने धनवतां प्रज्ञावतां सौख्यदे
चण्डद्विड्मदखण्डने जयपुरे दण्ड्यान् मुहुर्दण्डयन् ।
नीत्या सम्प्रति पालयन्विनयिनः पाखण्डिनः खण्डयन्
अस्ति श्रीनृपरामसिंहसुमतिः सत्पण्डितान्मण्डयन् ।। २ ।।
तस्य श्रीरविवंशमानससरःपद्मस्य सत्कीर्तिसद्-
गन्धाकृष्टसुधीरवीरबुधषट्पात्सन्ततेर्भूपतेः ।
भूदेवामरवन्दनीयचरणश्रीमेनकानन्दिनी
स्वान्तानन्दनचारुचन्द्रभरणे भक्तिः समस्तेश्वरे ।। ३ ।।
नानाकर्मजपुण्यबीजभवसंस्काराङ्कुराधीक्षितौ
जाता कल्पलतेव शैवजनसत्सङ्गाम्बुसिक्ता भृशम् ।
संवृद्धा निजपार्श्ववर्तिजनसद्हृन्मञ्चके विस्तृता
तज्जेशार्चनपुष्पकीर्तिसुरभिं विद्वान्पुरत्रानयत् ।। ४ ।।
तज्ज्ञात्वा शिवपादपङ्कजरजः श्रीमान् सुरूपो नृपः
श्रीमच्छाङ्कररामसिंहनृपतिप्रीत्यै प्रमाणैर्युतः ।
कार्यः सङ्ग्रह इत्यवोचदथ तत्तुष्ट्यै यथाबुद्धि यं
श्रीमच्छैवसुधाकरो मतिमतां ल्हादाय संतन्यते ।।५।।
remains incomplete on f. 49.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

208. (124) **गोवर्द्धनसप्तशतीटीका—रसिकचन्द्रिका**

OPENING : श्रीगरणपतये नमः ॥
(ct.)
कलयाम्यनेकदन्तं विदन्तमन्तः स्फुटैकदन्तमपि ।
विभुज चतुर्भुजं यं जगन्ति गायन्ति मोदकैकभुजम् ॥
श्रीमत्पितृचरणानामिदं पद्यम् ॥
पीत्वा कर्णपुटेन यत्कलरवानाभीरवामभ्रुवः
कान्तोपान्तनितान्तनिर्गमधिया प्रौढा नवोढायिताः ।
मुग्धानामपि साम्प्रतं वितनुते दूती बहूक्ति मुदा
श्रेयः संततमातनोतु मुरली सेयं मुरारेर्मुहुः ॥२॥

CLOSING : नैव व्याकृतिरुत्तमा न बहुधा कोषो न वाऽलङ्क्रिया
(ct.)
रुद्रस्येव ममार्द्धचन्द्ररुचिराभिख्यस्य विख्यातिनः ।
आर्येयं स्फुरिता नितान्तसरसा प्राग्जन्मसंस्कारतो
व्याख्या (सा) जगतां तनोतु नितरामन्तः सतां मङ्गलम् ॥

Colophon : इति श्रीमदात्रेयवंशावतंसश्रीबालकृष्णभट्टतनूजगोकुलचन्द्रविरचिता
रसिकचन्द्रिकाभिधाना गोवर्द्धनसप्तशतीटीका समाप्ता ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥
मिति जेष्ठ शुद्य ९ संवत् १८४६ ॥ श्रियैरस्तु

210. (218-2) **रसिकरसमाधुरी**

OPENING : श्रीमद्रासविहारिणौ जयताम् ॥
अथ शरत्, मूलम्
शरदि प्रेयसिप्रेष्टौ मध्येऽङ्कमालया युतौ ।
कृष्णञ्च बहुधाभूतं प्रतिगोपीस्वरूपिणम् ॥१॥
रासयन्तावनुध्यायेच्छ्रीमद्गौतमके यथा ।
आरभ्यादौ महारासं नृत्यवाद्यप्रहर्षितौ ॥ २ ॥
दृष्ट्वा कामकलास्फूर्तीं मूर्तिमदद्भुतालयौ ।
मुहुर्मुहुर्देवतादेव्यः पन्नगीपन्नगेश्वराः ॥ ३ ॥

CLOSING : श्रीभागवतामृते,
एवं प्रभोः प्रियाणां च धाम्नश्च समयस्य च
अविचिन्त्यप्रभावत्वादत्र किञ्चिन्न दुर्घटम् ॥
श्रीमहाशयैः,
वाङ्मयेषु मधुरा हरिगाथास्तासु कृष्णचरितान्यमृतानि ।
तेष्वपि प्रमददिव्यधुनीं मे रासकेलिमनुमज्जत चेतः ॥ २२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Colophon : इति श्रीविहारीपदपङ्कजभ्रमरायमानरसिकानन्दकृते रसिकानुकूल-यामुनादासविलिखिते रसिकमाधुर्यां वार्षिकीकेलिवर्णने शरद्वर्णनं तृतीयास्वादः ।। मिति श्रावणवदी १४ सोम्वार संवत् १९११ श्रीराधा-कृष्णाभ्यां नमः ।।

211. (218–1) **राधासुधानिधिः**

OPENING : ।। श्रीराधावल्लभो जयति ।।

अस्य श्रीराधासुधानिधिः लिख्यते ।। वसन्ततिलकछन्दः ।।

यस्याः कदापि वसनाञ्चलखेलनोत्थ–
धन्यातिधन्यपवनेन कृतार्थमानी ।
योगीन्द्रदुर्गमगतिर्मधुसूदनोऽपि
तस्या नमोस्तु वृषभानुभुवो दिशेऽपि ।।१।।
ब्रह्मेस्व(श्व)रादिसुदुरूहपदारविन्द-
श्रीमत्परागपरमाद्भुतवैभवायाः ।
सर्वार्थसाररसवर्षिकृपार्द्रदृष्टे—
स्तस्या नमोस्तु वृषभानुभुवो महिम्ने ।।२।।
यो ब्रह्मारुद्रशुकनारदभीष्ममुख्यै-
रासक्षितो (संशितो) न सहसा पुरुषस्य तस्य ।
सद्यो वशीकरणचूर्णमनन्तशक्ति
तं राधिकाचरणरेणुमनुस्मरामि ।।३।।

CLOSING : अनुष्टुप्—अद्भुतानन्दलोभश्चेत्तन्मनसा रससुधानिधिः ।
स्तवोऽयं कर्णकलशैर्गृहीत्वा पीयतां बुधाः ।।७०।।

Colophon : इति श्रीवृन्दावनेश्वरीचरणकृपामात्रविजृम्भितश्रीराधासुधा-निधिः स्तवः समाप्तः ।।श्रीहितहरिवंशगोस्वामिना विरचितः।। शुभमस्तु सम्वत् १९६० चैत्रकृष्ण १ भौम ।।

220. (150) **परिभाषाप्रदीपार्चिः**

OPENING : श्रीगणेशाय नमः

आनन्दं हृदयानन्दनिदानं शिवयोश्चिरम् ।
नमस्कुरुत हेरम्बं निष्प्रत्यूहफलाप्तये ।।१।।
वल्लकीपुस्तककरां पुण्डरीकासनस्थिताम् ।
शारदां नीरकुन्देन्दुधवलां भावयेतराम् ।।२।।
कृत्वा पाणिनिसूत्राणां मितवृत्यर्थसङ्ग्रहम् ।
परिभाषाप्रदीपार्चिस्तत्रोपायो निरूप्यते ।।६।।

CLOSING : परिभाषाप्रदीपार्चिष्युदयङ्करदर्शिते ।
द्वितीयो व्याकृतोऽध्यायः संगतः संगतः सताम् ।।१।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

न तुष्यन्ति मितोक्त्येके परे मूढा बहूक्तिषु ।
करवाणि वतो वाणि सकलावर्तनेऽञ्जलिम् ।।२।।
इति द्वितीयाध्यायः ।।
संवत् १८७५ आषाढशुद्ध १० मुकाम सागर ढुण्ढिराजो लिलेख ।।

221. (123) **शब्दकौस्तुभः**

OPENING : श्रीगणेशाय नमः ।।

1st. आह्निक विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्ति वरीभर्ति संजरीहर्ति लीलया ।।१।।
नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयम् ।
श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान् बुधान् ।।२।।
नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितम् ।
फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ।।३।।
परिभाव्य बहून् ग्रन्थान् योऽर्थः क्लेशेन लभ्यते ।
तमशेषमनायासादितो गृह्णीत सज्जनाः ।।४।।
समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभम् ।
भट्टोजिभट्टो जनुषः साफल्यं लब्धुमीहते ।।५।।

प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् । अथ शब्दानुशासनमिति ।

Colophon : (2nd Ahnika) on f. 29.

"इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं समाप्तं श्रीगणेशार्पणमस्तु ।। संवत् १८७२ मिति जेष्ठशुक्लचतुर्दश्यां १४ भौमवासरे लिखितमिदं श्रीगजानन जय गजानन जय जय गजान (न) श्रीमहागणाधिपतये नमः श्रीमाहालक्ष्मीचरणकमलेभ्यो नमः" ।।

Colophon : (4th Ahnika) on f. 27.

"इति श्रीशब्दकौस्तुभे चतुर्थमाह्निकं समाप्तिमगमत् ।। शुभमस्तु ।। श्रीगजाननो विजयतांतराम् ।। ग्रन्थसंख्या ६८२ माघशुक्ल १ संवत् १८६९

(5th Ahnika) on f. 26

" ...... ।। संवत् १८७० मार्गशीर्षकृष्ण ५ ।। गणेशः प्रीयतां मम" ।।

CLOSING : (9th Ahnika) on f. 48

एतदेवं व्यवस्थितविभाषयैव सिद्धं ।। वाहीकग्रामो ।। देवदत्त इति ।। देशबहिर्भूतेषु वाहीकेषु देव(द)त्तो नाम ग्रामस्तत्र भवो देवदत्त इति अर्थः ।। इति नव (म) माह्निकं ।। श्रीरामाय नमः ।। श्रीगणेशाय नमः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

229. (182) **द्विरूपकोशः**

OPENING : श्रीगणेशाय नमः

प्रबोधमाधातुमशाब्दिकानां
कृपामुपेत्याथ सतां कवीनाम् ।
कृतो मया रूपमवाप्य शब्द-
भेदप्रकाशोऽखिलवाक् प्रयासैः ॥१॥
ज्ञेयो भवेद्यश्चतुरप्रयोगः
प्र(ा)माणिकोदाहरणप्रतीतैः ।
रूपादिभेदेषु विलक्षणेषु
विचक्षणो निश्चिनुयातमेवम् ॥ २ ॥

CLOSING : वदन्ती किंवदन्ती स्यादित्यत्रापि पदद्वयम् ।
आपः पयः पयस्तोयमित्यत्रापि पदद्वयम् ॥ ११८ ॥
शब्दभेदप्रकाशोऽयं शब्दशास्त्रविदो न चेत् ।
शब्दशुद्ध्यै मया तेषां कृतो मृत्युञ्जयाज्ञया ॥ ११९ ॥

Colophon : इति श्रीद्व्यक्षरनिघण्टुः समाप्तः। शुभं भवेत्, शाके १७७७ प्रभवनाम-संवत्सरे भाद्रशुक्लपक्षे २ द्वितीयायां गुरुवासरे संवद् ॥ १९१२ ॥ अमृतनगर। इत्थं श्रीकविराजराजिमुकुटालङ्कारहीरायित ।।श्री हीरात्मभवेन नैषधमहाकाव्योज्ज्वलत्कीर्तिना उद्दत्तप्रतिवादिमस्तकतटी ॥ श्रीशङ्करसाम्ब०

231. (48–14) **मङ्खकोशः**

OPENING : ॐ नमो भगवते वासुदेवाय ॥ ॐ नमो विघ्नहर्त्रे ॥
ॐ नमो भवान्यै ॥ ॐ नमो गुरवे ॥
ॐ पातु वो **धिधरं**(?)दूरविकीर्णकरशीकरः ।
दुःखबीजच्छिदो वर्षन् करका इव विघ्नजित् ॥
विषमपदविषधरालीं निहत्य साहित्यशेवधिविशेषान् ।
सकलजनसुलभविभवान् कश्चन निर्मत्सरः कुरुते ॥
भागुरिकात्यहलायुधहुड्गामरसिंहशाश्वतादिकृतान् ।
कोशान्निरीक्ष्य निपुणं धन्वन्तरिनिर्मितं निघण्टुं च ॥
लिङ्गानुशासनानि च विचार्य लक्ष्यं महाकवीनाञ्च ।
कुरुतेऽनेकार्थानां शब्दानां मङ्खकः कोशम् ॥

CLOSING : On 49 (a); no. 1 of विश्वकोश on the back
हि-शब्दः स्याद्विशेषार्थे हेत्वर्थे चावधारणे ।
अहा क्षेपे विनियोगेऽहह खेदोऽद्भुते तथा ॥
हान्ताः अभ्यादानेऽभ्युपगमे तूष्णींभावे समापने ।
दानप्रतिग्रहादौ स्यादोङ्कारोऽपि च मङ्गले ॥
इति मङ्खकोशः सम्पूर्णः समाप्तः ॥ शुभं भूयात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

232. (48–13) **महाराजकोश :**

OPENING : on f. 8 of धनञ्जय or रत्नकोश ।

ॐ नमः सरस्वत्यै ।

श्रीगणेशाय विश्वेशवैभवाद्भुतकेतवे ।
नमो निर्विघ्न(घ्न)मारब्धकार्यनिर्वाहहेतवे ।। १ ।।
जयति **श्रीमहासिंहभूपालो** योऽयमुद्यतः ।
स्वं विस्तारयितुं कोशं परितोषाय सद्धियाम् ।। २ ।।
पाणिनीयनयोन्नीतैर्विश्रुतैश्चाभिलोकयोः
नामरत्नैर्वहत्तोषो राजकोशो वितन्यते ।। ३ ।।
कांड .... क्रमारूढामकरोत्कोशतरोरियम् ।
मद्वाङ्लताऽल्पाप्यत्युच्चैः पुष्पत्यपि फलत्यपि ।। ४ ।।
अदन्तादिक्रमेणात्र यथालाभं निवेद्य (द) येत् ।
शब्दा द्विस्त्रिस्तथोच्यन्ते लिङ्गज्ञानाय ते पुनः ।। ५ ।।

It is not traceable where the महाराजकोश ends and the मङ्खकोश begins. The page nos. are also in continuation.

There appears to be an irregularity in the arrangement of folios by the binder. He has put ff. 31 to 40 between f. 20th & 21st of महाराजकोश. The Maharaja-kos'a, however, ends on f. 28 as below:—

करहाटः शिफाकंदः कर्दः कंदंशिफावसा ।
संवर्तिका नवदलं संवर्तिर्नवपत्रिका ।।
पद्माक्ष..................दक्षबीजं वंतर्मतं ।
कर्णिकायां पद्मकोशो बीजकोशो वराटकः ।
।।इति श्रीमहाराजकोशः संपूर्णोऽयं समाप्तः ।।

श्रीराम ।। कोशः महाराजकोश पुस्तकम् पत्र २० ग्र १००० ।।

235. (137–3) **वैदिकशब्दानां निघण्टुः**

Post-colophonic : शके ।। १७८५ विकारिनामसंवत्सरे ।। कन्याकुमारिक्षेत्रे रेवाया उत्तरे तीरे उत्तरायने ।।

इदं पुस्तकं वामनभट्टज्योतिषि धर्माधिकारी व अष्टा अधिकारि मुरवांगालेर येथें पुस्तकं लिखितं ।। मूल टिकांग विरअसे ।। श्रीरामचन्द्र प्रसन् ।। ।। ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

238. (52) **पिङ्गलशास्त्रम्**

The manuscript is of an earlier date than 1726–V.S. as mentioned in the Post-colophonic in a different hand-writing :—

'इह पोथी ………… की छै पढिबा की ।। सं १७२६ भादवा-वदि९ इह पोथीका पत्रः १३ अंके पत्र तेरा छै ।। सर्व जीव सुषी हो ।।श्री।।

239. (30) **वृत्तचन्द्रोदयः**

OPENING : श्रीमहागणाधिपतये नमः ।। श्रीपिंगलाचार्याय नमः ।।
ब्रह्मैकं शिवशक्तिवल्लगयुगं जां त्रिमूर्त्यात्मकं
धीश्रीस्त्रीशवदष्टमूर्ति च ततो मध्यादिना कीतवत् ।।
तत्प्रस्तार्य पदार्थजातमतनोत्तस्मै शिवायों नम–
स्तत्वं यैरिदमर्पितं मयि निजं तेभ्यो गुरुभ्यो नमः ।।१।।
यो गपरोन्तेवासी लघुरतिमात्रो गुरुर्भवति ।
यस्योपदेशमात्रात् पिंगलनागः स मंगलं देयात् ।।२।
भारत्युपाख्य बुधमण्डन-सोमपीथि–
गम्भीरराजसुतभास्करराजशैवः ।
छन्दांसि वक्ति सगपानि सलक्षणानि
संश्रय्य यानि समतानि सयुक्तिकानि ।।३।।
विश्वामित्रवंश्यः शिवभजनपरो भारतीसोमपीथी
काश्यां गंभोरराजो बुधमणिरभवद्भास्करस्तस्य सूनुः ।
मार्ग्यां साधारणेऽब्दे द्विशरनयशके वृत्तचन्द्रोदयाख्यां
व्याख्यां मुख्यामकार्षीदभिनववपुषो वृत्तरत्नाकरस्य ।।१।।
चत्वारो निगमाः षडङ्गसहिताः साहित्यसङ्गीतके
मीमांसा कणभक्षगोतमनया विध्यंकलाः षोडश ।
एकद्वित्रिमुखक्रमात् कलयती ते दर्शादिराकात्मना–
मेकोऽप्येष विभाति षोडशविधः श्रीवृत्तचन्द्रोदयः ।।२।।
अत्यन्तं बुद्धिमन्तः प्रतिजलधितलस्पर्शिनो द्वीपवर्त्मा–
न्यावृतवन्तः समन्ताद्विविधमणिगणाकर्षिणः सन्ति लोके ।

(अग्रे अस्पष्टं)

CLOSING : षोडशमयूखरुचिरः षोडशविद्याविदधिकृतो ग्रन्थः ।
षोडशयुग्द्विसहस्रः षोडश्यम्बा प्रसादतः पूर्णः ।।४।।
सार्धे सप्तदशे गते वयसि मे सत्कौस्तुभौ निर्मितां (तौ)
विंशेऽब्देऽमृतजीवनी विरचिता प्राचीनरत्नाकरे ।
पश्चाद् वादकुतूहलादिकृतयस्तत्रान्तरे द्व्यष्टौ कृतः
पञ्चाशत्सु समास्वयं विरचितः श्रीवृत्तचन्द्रोदयः ।।५।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Colophon : इति श्रीमत्कोनमावा (?) गंभीररायदीक्षितसूरिसूनुना भास्कररायेणोन्नीतो वृत्तचन्द्रोदयः सम्पूर्णः ।। करकृतमपराधं क्षंतुमर्हंतु सन्तः । मिती वैसाख सुदि १३ गुरदिने संपूर्णमगमत् संवत् १७९९ लिखतं जोसी परसरांम ।। श्रीरस्तु ।। श्रीगणेशाय नमः ।। श्रीरामाय नमः ।। श्रीकृष्णाय नमः ।।

245. (44). ऊकरग्रन्थः

OPENING : ।। श्रीगणेशाय नमः ।। श्रीगुरुचरणाभ्यां नमः ।।

अथ ऊकराख्यो ग्रन्थः सावजूसयूसकृतो लिख्यते ।। तत्राऽस्य त्रयोऽध्याया एकोनषष्टि तुल्यानि ५९ क्षेत्राणि सन्ति ।। परं च क्वचित् पुस्तकेऽष्टपंचाश ५८ न्मितान्येव क्षेत्राणि सन्ति ।। तत्र प्रयोजनद्वयस्यैकक्षेत्रमेवकृतं ।। इदं यूनानीभाषातः अरबभाषायां अबुलअब्बास अहमदस्याज्ञया कुस्ताविनिलूका बालबक्कीसंज्ञेन तृतीयाऽध्यायस्य पञ्चमक्षेत्रपर्यन्तं ग्रथितं शेषमन्यैर्ग्रथितं ।। इदं सावित बिनि कुसै संज्ञेन शोधितं ।। नसीरसंज्ञेन टीका कृता ।। सेयं संस्कृतशब्दैर्निबद्ध्यते ।।

अथ प्रथमाऽध्यायः ।। तत्र द्वाविंशति क्षैत्राणि सन्ति ।। तत्रादौ परिभाषा ।। एकधरातलेन पञ्चक्षेत्रं तथा वेक्ष्यते यथा तदन्तर्गत मध्यदेशैकचिह्नान्निसृतानि सूत्राणि आवेष्टकधरातलपर्यन्तं सर्वाणि समानानि भवन्ति तस्य गोलक्षेत्रमिति संज्ञा कृतास्ति ।।

Colophon : इत्युकरं सावजूसयूससंज्ञस्य समाप्तं ।।अस्मिन् अध्यायत्रयमेकोनषष्टि ५९ क्षैत्राणि सन्ति ।।

सं. १७८६ का. शुक्ल १३ गुरौ ।। समाप्तश्चायं ग्रन्थः ।। श्रीरस्तु न तुष्टये ।।

इदमारवीभाषात आविदसंज्ञैः कथितं नयनसुखोपाध्यायैः संस्कृते ग्रथितं ।।

शुभं भूयात् ।।

246 (195). कालनिर्णयसङ्ग्रहः

CLOSING : गीष्पतिर्धर्मे शास्त्रेषु व्याकरणे पाणिनीयवत् ।
षड्रस चन्द्रहंसेनं परमार्थः कृतः सङ्ग्रहः ।।
पुस्तकमिदं दुग्वेकरोपाह्व धुण्ढिराजशास्त्रिणः ।

249. (23) जीच नित्यानन्दी शाहजहाँनी

OPENING : ॐ नमः ।।श्रीमहागणपतये नमः ।।

सिद्धं साध्यमिदं विधेरपि जगद्यच्चेतसि ध्यायतो
यत्स्मृत्वैव पुरा पुराणपुरुषोऽपीच्छावतारान् दधौ ।
यज्ज्योतिः परमं निधाय हृदये तेपे तपोऽपीश्वर–
स्तस्मै मंगलमूर्तये त्रिविबुधाराध्यैक तुभ्यं नमः ।। १ ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वेदाज्ञापरिपालनाय जगतो निःश्रृङ्खलस्य स्थितौ
यश्चक्रे श्रुतिसम्मतार्थकलना नानापुराणस्मृतीः ।
ग्राचारव्यवहारमस्य कृपया सत्यं परं दर्शयन्
संसारार्णवतारणो विजयते सोऽयं मुनीनां गणः ।। २ ।।

यस्योपदेशवचनौषधभक्तिपत्थ्यप्रायोनिषेवननिरस्तसमस्तमोहः ।
विद्वत्सभामुपविविक्षुरिवास्मि तस्मै विज्ञानकल्पतरवे गुरवे नमोऽस्तु ।। ३ ।।

जम्बूद्वीपान्तरालावनिकमलदृशो याऽस्ति कर्णस्य भूषा
वर्षेऽस्मिन् भारताख्ये जनपदनगरी नागरीमौलिमाला ।
यस्याश्चाग्रे समग्रा विबुधवसतयः किं पुनर्यक्षपुर्यः
सेयं ढिल्ली मतल्ली वरधरणिभुजां राजते राजधानी ।। ४ ।।

ग्रासीत्तैमूरनामा चतुरुदधिधराधीश्वरो यश्चगत्ता
मीराशाहाभिधानस्तदनु सुतनयः तस्य राजाधिराजः ।
तज्जः सुल्तान्महोम्मत् क्षितिपतितिलको ह्यात्मजोऽभूत् सयीदो
भूभृन्नक्षत्रचन्द्रो रिपुकुलदलनोद्दामधामैकमल्लः ।। ५ ।।

तदनु तत्तनयोऽतिपराक्रमः सकलराजगजोद्धतकेसरी ।
उमरशेष इति प्रथितो नृपः समभवन्नृपवंशविभूषणम् ।। ६ ।।

यवनवरचगत्ता नामवत्ता समेतस्तिमुरनृपतिवंशस्फीतवर्णावतंसः ।
निखिलधरणिचक्रे चक्रवर्त्यस्य सूनुः, क्षपितरिपुगणोऽसौ बाबरोऽस्यावरोऽभूत्
।। ७ ।।

Then Humayun, Akbar and Jahangir praised upto verse 10th.

तत्पुत्रः प्रबलप्रचण्डविलसद्दोर्दण्डखण्डीकृता–
ऽरातिव्रातधृतातिनिर्मलयशः प्रक्षालितक्ष्मांबरः ।
प्रत्यक्षप्रतपत्प्रतापतपनध्वान्तान्धकारव्रजः
श्रीमान्शाहजहाँ समस्तजगतीराजाधिपो राजते ।। ११ ।।

9 verses more upto 20th follow in the praise of शाहजहाँ ।
Then the author introduces ग्रासफजहाँ, the Primeminister.

तस्यामात्यगणेषु भेषु विधुवद्वृक्षेषु कल्पद्रुवत्
पृथ्वीभृत्सु सुमेरुवद् ग्रहचये ध्वान्तान्तकृद्बिम्बवत् ।
यो यक्षेषु कुबेरवत् सुरगणे देवेन्द्रवद्भात्यसौ
मन्त्री चासफखाँ बृहस्पतिसमो वर्वर्ति सर्वोपरि ।। २१ ।।

तस्य प्रेरणया नृपालमुकुटालङ्कारचूडामणि–
र्माभाज्ञापितवान् सुतंत्रकरणे लोकोपकाराय यत् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्रीमत्साहजहाँ प्रकाशममलं सिद्धान्तसिन्धुं स्फुटं
नित्यानन्द इति प्रसिद्धगणकः कर्तुं समीहे ततः ।। २४ ।।

सत्यं सत्यपयोनिधे तव यशोमुक्ताफलानां गणा–
स्तेजोरत्नचयाश्च कुत्र न महीपृष्ठे विकीर्णाः स्थिताः ।
किन्त्वेतान् गुणवन्त एव सुधियो बद्ध्वा स्वकीयैर्गुणैः
कण्ठेषु श्रवणेषु च त्रिजगतामाभूषणीकुर्वते ।। २५ ।।

अपारसंसारगभीरनीरधौ सुतंत्ररत्नानि कियन्ति सन्ति न ।
तथापि दृक्प्रत्ययकारखेचरं तनोमि तंत्रं यवनोक्तियुक्तिभिः ।। २६ ।।

यत्किञ्चित्कथितं मयाऽत्र विशदं तत्रास्ति यो विस्तरो
बालानामवबोधनाय तदहो दोषो न मे दीयताम् ।
एतस्मादपि यावनेऽधिकतरस्तन्त्रोत्तरे विस्तरः
किं वा किं भयमत्र विदुषां ब्रह्माण्डविज्ञानिनाम् ।। २७ ।।

ये केचिज्जडबुद्धयोऽपि गणितं ज्ञातुं विधातुं तथा
किं वा तन्त्रविचारसारचतुराः सद्बुद्धयोऽपि स्वयम् ।
किं वा मध्यमबुद्धयोऽपि गणका वाञ्छन्ति चेल्लीलया
सिद्धान्तं यवनोक्तियुक्तिकमिमे सर्वे पठन्तु स्फुटम् ।।२८।।

प्रत्येकलिप्त्या गणितं सुसूक्ष्मं सद्वारतत्रं वासनया समेतम् ।
अस्माभिरस्मिल्लिखितं समस्तं विलोक्यतां सद्गणकैः प्रवीणैः ।।२९।।
यदवद्यमिहोदितं मया भ्रमतस्तद्विबुधैर्विभूष्यताम् ।
न भवन्ति कदापि सज्जना गुणवन्तः परदोषसङ्ग्रहाः [।।३०।।]

पञ्चाष्टभूयोन्मितसौरवर्षैः [।।१६८५।] श्रीविक्रमार्कस्य शाके व्यतीते ।
तस्थौ समस्तक्षितिपालसिंहः सिंहासने शाहजहाँ नरेन्द्रः ।।२५।। [।।३१।।]

The 2nd काण्ड finishes on f. 28–a as below :—

यः श्रीशाहजहाँनृपालमुकुटालङ्कारचूडामणि–
स्तस्याज्ञामवलम्ब्य दुस्तरममुं सिद्धान्तसिन्धुं तरन् ।।
नित्यानन्द इति द्विजोत्तमकृपः श्रीदेवदत्तात्मज–
स्त्रिप्रश्नप्रचुरोक्तियुक्तिसहितं काण्डं द्वितीयं ह्यगात् ।।१९।।

शुभमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्ति सर्वत्र सुखीभवन्तु लोकाः ।।

शुभं भूयात् ।। श्रीः ।।

The back of f. 28 is blank; then tables start with f. 29 and continue upto f. 442–a; 441–b and 442-a are blank. Again, there is a table on 442–b and 443–a.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Colophon : on 443-a in horizontal lines :—

शुभमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्ति सर्वत्र सुखीभवन्तु लोकाः ।।श्रीः।।

संवत् १७८४ वै वदि ११ गुरुवारे मध्याह्नसमये इदं नित्यानन्दो-
जीचपुस्तकं समाप्तिमगमत् ।। शुभं ।।

मयेदं गंगारामेण काश्मीरेणैव वासिना ।
लिखितं कायकष्टेन नित्यानन्दजीचपुस्तकम् ।।१।।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ।।२।।

श्रीराजा जयसिंहेन इदं पुस्तकं लिखापितं परोपकारार्थम् ।।
श्रीः ।। श्रीराम ।। श्रीः ।। श्रीः ।। श्रीरामाय नमः ।।

On f. 443b.

जीच मूल करो सु पातिशाह के किताबषानें मांहि हे ।।

१ बंगाले आजमषां को दई
१ पटणे अब्दुल्लहषां को दई
१ बनारसी दई साहब सूबेकों
१ दिल्ली इतकादषां को दई
१ उज्जयण षांनदोरा को नवशेरीषां
१ बुरहानपुर महाबतषां खानखाना
१ लाहोरि उजीरषां
१ कश्मीर जफरषां
१ मुलतान
१ नित्यानन्द

११ जमा

f. 444 a–blank; on its b-side it is mentioned that the book containing 444 leaves was written by गंगाधर लेषक; he was paid Rs. 242 on the basis of daily wages. It was entered on जेठ सुदि ५ संवत् १७८३.

This Svt. 1783 is according to the State Svt. of Jaipur which started from भादवा सुदि २. Thus the चैत्रादि संवत् on that day was 1784.

It is also mentioned that ff. 44 to 50 are missing, but they are there in the ms.; ff. 341 to 347 are inverted.

The ms. is bound with misru cloth with black and white stripes.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

258. (190) प्रश्नसिन्धुः

OPENING : ।। श्रीगणेशाय नमः ।।

नत्वा श्रीप्रियचरणारविन्दयुग्मं
पार्वत्यास्तनयमथो मृडं मृडानीम् ।
प्रश्नाख्यं विमलधियां मुदेऽथसिन्धुं
दैवज्ञः प्रविचारयामि वासवोऽहम् ।।१।।

CLOSING : पुरं यच्छीसंज्ञं महति गढवाले जनपदे
प्रतीरे जाह्नव्या विविधबुधवीथीविलसितं ।
विपश्चित्तत्राभून्मुनिवरभरद्वाजकुलजो
गुणानन्दाभिख्यो विमलमतिरीशार्चनरतः ।।१।।

अतो लीलानन्दोऽजनि गणकमालार्चितपदो
जगत्ख्यातः सूरिर्गुणगणिजिताखण्डलगुरुः ।
अथैतस्याप्यासन् विमलधिषणा सप्त तनया
द्वितीयो यस्तेषां मतिनिपुणधीर्वासवकविः ।।२।।

स पाश्चात्यो राजन्वति जनपदे मेरौ गिरि-
पुरे सौजानाख्ये नवदहनवादान्वितशके
मृगर्क्षस्थे भानावसित र(वि)पक्षे भृगुदिने-
ऽकरात्प्रश्नं सिध्वाह्वयमिह महोनिर्जरवरः ।।३।।

श्रीवासवानन्दकवेः प्रबन्धे श्रीप्रश्नसिन्धौ विमलोक्तियुक्ते ।
युक्तोऽष्टोऽसौ त्रिभिरेव वृत्तै-र्वेशाभिधानो रुचिरस्तरङ्गः ।।
शकः १८२५ मीनार्कांशे २६ लिखितं प्रश्नसिन्धौ उपाध्यायनीलकण्ठेन
शुभं ।।

261. (31) यंत्रप्रकारः

Here is a description of several यन्त्रs devised by M. Savai Jaisingh for his observatories after consultation of certain Persian works. Astronomical tables are also given.

Some of the subject-headings :—

1. क्रांतिवृत्तसाधनम्
2. सर्वदेशीयकपालयन्त्रस्य कर्तव्यता
3. सारणीप्रकारः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4. अक्षांशाः (latitudes) of certain famous cities,
5. चूडागणितस्य यन्त्रप्रकारः
6. श्री महाराजाधिराजविरचितयंत्राणि :—

1. जयप्रकाश 2. नाडीवलय 3. क्रांतिवृत्त 4. पलभायंत्र 5. दिगंश-यंत्र 6. शरयंत्र 7. अग्रायंत्र 8. याम्योत्तरमितिः 9. जातुल हलक 10. यंत्रराज 11. जातुशुकवतैन 12. सुदस्फकरी षष्ठांश 13. जातुशुकतैन 14. शंकुयंत्र 15. प्रतिराशीनां क्रांतिवृत्तानि ।

264. (192) **रत्नद्योतः**

OPENING : ।। श्रीगणेशाय नमः ।।
नत्वा रामं गणपतिं समीरतनयं शिवम् ।
रत्नद्योतमहम्वक्ष्ये बालानां हितकाम्यया ।।
आदौ वरकन्ययोर्मैत्रीविचारः —
अश्विन्यार्द्रा शतभिखा फाल्गुणी चोत्तरा तथा ।
पूर्वभाद्रपदा मूलज्येष्ठा हस्तपुनर्वसु ।।२।।
…… ………………

remains in complete on f. 9-a as under :—
स्यान्मीनधन्विनोर्जीवः शनिर्मकरकुम्भयोः
सिंहस्याधिपति सूर्यः राशिनाथ उदाहृता ।।३५।।
जीवसिस्कृतमर्कजेन्क्षिति सुते दग्धं ………
f. 9b blank.

266. (33) **वक्रमार्ग–विचारः**

OPENING : ।। श्रीगणेशाय नमः ।।
अथ वक्रमार्गविचारः ।। खाकानीजीचस्य नवमाध्यायस्थो निरूप्यते ।। तत्र नीचोच्चवृत्त-केन्द्रगतया भूकेन्द्रे ये कोणा उत्पत्स्यंते तेषां कोणानां यत्प्रमाणं सैव मंद-स्पष्ट-गतिरस्ति । सा च सदैव पश्चिमतः पूर्वेऽस्ति ।।

CLOSING : १६८–२६–५२ इयमुच्चस्थानात् वक्रारंभपर्यन्तं शीघ्रस्पष्ट-गतिरस्ति ।। एवं कर्णेभ्यो गणितं कृत्वा शीघ्रगतयः सारिण्यां लिखिताः ।

268. (46) **शरह तज़करः वर्जन्दी**

OPENING : ।। श्रीगणेशाय नमः ।। अथ शरह-तजकिरा-वर्जंदी-ग्रन्थस्यैकादशमं प्रकरणं लिख्यते ।।

अत्र ग्रहगतौ यानि वस्तूनि कठिनतरानि (णि) संदिग्धानि संति तदुपपादकयुक्तयो निरूप्यन्ते ।। अस्य मूलग्रन्थस्य तजकिरासंज्ञस्याचार्यो नसीरतूसीत्यभिधानकोऽस्ति ।। भाष्यकर्त्ता मुल्लां अली वर्जन्दी-संज्ञोऽस्ति ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथात्र चन्द्रगोले प्रथमोऽयं संदेहोऽस्ति ।। चन्द्रस्य प्रतिवृत्त-गतिर्भू केन्द्रेऽस्ति न स्वकेन्द्रे । अपेक्षितस्तु चन्द्रः प्रतिवृत्तं निज-केन्द्रे भ्रमणं करोति ।।... ..

CLOSING : इदं यत्किञ्चित् कथितं तत्साहेब तुहफा पुस्तकेभ्यः पृथक् पृथक् किञ्चित् किञ्चत् गृहीत्वा मया एकत्र कथितं ।। इदं नसीरतूसीकृत-तज्करा-ग्रंथस्य व्याख्याने मुल्ला अली–वर्जन्दीकृते एकादशप्रकरणं हल्लिमालायनहल्लसंज्ञं समाप्तं ।।

Colophon : इदं महम्मदाविद्संज्ञैककथितं नयनसुखोपाध्यायैः संस्कृत-शब्दैर्निबद्धम् । संवत् १७८६ शा. १६५१ पौष शुक्ल ७ भौमे समाप्ति-मगमत् ।। क्रिपारांमेण लिपीकृतम् ।।

272. (47) **सोमसिद्धान्तः**

OPENING : ।। श्री वरदमूर्तिर्जयति ।।

वृहस्पतिसुतं शान्तं सुखासीनं प्रियेक्षणम् ।
अभिवन्द्य मुनिर्धीमान् शौनकः परिपृच्छति ।।१।।
भगवन् सर्वशास्त्रज्ञ सर्वभूतहिते रत ।
कथं ग्रहस्थितिर्यावल्लग्नकालविधा क्रमात् ।।२।।
उपरागश्च खेटानां योगश्चारग्रहःक्रमात् ।
ग्रहर्क्षस्योदयः पातस्तत्रापि ग्रहरूपिणः ।।३।।
शृंगोन्नतिर्जगत्सृष्टि-स्थितिसंहृतयोऽपि च ।
एतन्मे संशयं छिन्धि भगवन्नोषधीपते ।।४।।

CLOSING : न तेभ्यः प्रददात्प्रीतः सम्यक् ज्ञानमनिन्दितम् ।।८४।।
तदेव देव तद्ब्रह्म वेदचक्षुः परं शुभम् ।
अध्येतव्यं सदा विप्रै रुत्तमैर्वेदवादिभिः ।।८५।।

Colophon : इति श्री सोमसिद्धान्ते चतुर्थो गोलाध्यायो दशमः ।।१०।। समाप्तिमगमदयं ग्रंथः ।। समाप्तं शुभमस्तु ।। संवत् १७३६ शम एव इति सुदि ५ पंचमि ।।

273. (24) **हयात-ग्रन्थः**

OPENING : श्रीगणेशाय नमः ।। अथ हयातग्रन्थो लिख्यते ।।
तत्रादौ संज्ञाऽध्यायः, मध्ये अध्यायद्वयं ।।
अंते प्रकीर्णकः ।। तावत् संज्ञा ज्ञातव्या ग्रंथप्रवृत्तये ।
तत्र संज्ञाऽध्याये खण्डद्वयं ।। प्रथमखण्डे रेखागणितवार्ताऽस्ति ।
द्वितीयखण्डे पञ्चतत्त्वनिरूपणमस्ति ।।१।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र संज्ञाऽयाये प्रथमं रेखागणितकर्त्ता निरूप्यते ।। इशारत-संज्ञा-योग्यं यत्स्यात् इन्द्रियजन्यज्ञानोपदेशस्य, हिंद्सा-संज्ञस्य, केनापि प्रकारेण विभागानर्हः स नुख्ता-चिह्नवाच्यः अथ च एकतो विभागार्हः एकतो विभागानर्हः स रेखा-शब्दवाच्यः खत-संज्ञ :।।

The last portion is illegible; some of the letters have faded away.

274. (210) **प्रस्तावरत्नाकरः**

OPENING : श्रीगणेशाय नमः ।। श्री सरस्वत्यै नमः ।। श्रीगुरुभ्यो नमः ।।

वन्दे तं गणनाथमार्यमनघं दारिद्र्यदावानलं
शुण्डादण्डविघूयमानसमलं ससारसिंधोस्तरिम् ।
यं नत्वा सुरकोटयः प्रभुवरं सिद्धिं लभन्ते परां
सिंदूरारुणविग्रहं परिपतद्दानाम्बुधारावृतम् ।। १ ।।

उच्चैर्ब्रह्माण्डखण्डाहतये सह चिरं कुम्भयुग्मं दधानः
प्रेङ्खन्नागारिपक्षप्रतिभटविकटश्रोत्रतालाभिरामः ।
देवः शंभोरपत्यं भुजगपतितनुर्स्पर्द्धि वर्द्धिस्वहस्त-
स्त्रैलोक्यैश्वर्यमूर्त्तिः स जयति जगतामीश्वरः कुञ्जरास्यः ।। २ ।।

अथ कविवंशवर्णनम् ।।

खारागढे महाराज्ये करणा पुरुषोत्तमः ।
आसीत् प्राज्ञः सतां श्रेष्ठः कुलशीलयुतः कृती ।। ५ ।।

अभवँस्तनयास्तस्य चत्वारो भूरितेजसः ।
तेषां श्रेष्ठः कृष्णदासो गुणैः श्रेष्ठस्तु सत्तमः ।। ६ ।।

तस्यानुजौ महात्मानौ दामोदरनारायणौ ।
कनिष्ठो हरिदासोऽभूद्विध्नराजस्य सेवकः ।। ७ ।।

ज्योतिश्शास्त्रवृहत्कथास्मृतिकथाचाणक्यसामुद्रकान्
ग्रन्थान् शाकुनपञ्चतन्त्रचरकान् काव्यादिकांश्चापरान् ।
आलोच्य प्रयतो मुदे मतिमतां प्रीत्यै च दुष्टात्मनां
विज्ञः श्रीहरिदास एष तनुते प्रस्तावरत्नाकरम् ।। ८ ।।
(हरिदासस्य ।।)

वर्षे (१६६४) वेदरसारसेन्दुकलिते माघासिते पञ्चमी
हस्तार्के वरवोरसाहिनृपतौ श्रीमद्गुढापत्तने ।
पुण्ये नर्मदकोटितीर्थविषये यः सम्पूर्णतामगाद्
विज्ञः श्रीपुरुषोत्तमात्मजकृतौ प्रस्तावरत्नाकरः ।। ६ ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Colophon : इति श्रीकरणकुलालङ्कारपुरुषोत्तमसूनुहरिदासविरचिते प्रस्तावरत्नाकरे ज्योतिःशास्त्रं समाप्तं ।। शुभमस्तु ।। श्रीविक्रमार्कसंवत् १८८२ शालिवाहनशके १७९७ उदगयने ग्रीष्मर्तौ आषाढे मासे कृष्णपक्षे त्रयोदश्यां भौमवासरे कृतिकानक्षत्रे वृषभस्थिते मिथुनस्थिते श्रीसूर्ये कर्कस्थिते देवगुरौ तद्दिने इदं पुस्तकं समाप्तं ।। सर्वद्ये इत्युपनामक अनन्तसूनु-वामनेन लिखितं ।। श्रीः ।।

276. (74) सुबुद्धि की पोथी

The following contents are notable:--

